International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(1): 118-120
© 2018 IJSR
www.anantaajournal.com
Received: 19-11-2017
Accepted: 22-12-2017

सूर्य मोहन कुमारः
पूर्वपुस्तकालयसहायक,
शिक्षाशास्त्राविभागः, का.सि.द.सं.
विश्वविद्यालय, कामेश्वरनगर,
दरभंगा, भारत

Corresponding Author:
सूर्य मोहन कुमारः
पूर्वपुस्तकालयसहायक,
शिक्षाशास्त्राविभागः, का.सि.द.सं.
विश्वविद्यालय, कामेश्वरनगर,
दरभंगा, भारत

# भवभूतेः परिचयः

सूर्य मोहन कुमारः

## प्रस्तावना

भासात्परं सुदीर्घकालमतीत्य रामकथामाश्रित्य नाटकस्य प्रणयनं भवभूतिना कृतम्। भवभूतेः कालोऽष्टमशताब्द्याः प्रारम्भांशे स्वीक्रियते। भवभूतिनाऽपि रामकथाया नाटकीयेतिवृत्तितया द्वैभाग्यं प्रकल्पितम्। तत्र महावीरचरिते बालकाण्डादारभ्य युद्धकाण्डषट्कनिबद्धेति वृत्तमुपनिबद्धम्। उत्तरकाण्डस्येतिवृत्तन्तु उत्तररामचरितनामके नाटके प्रस्तुतम्। भवभूतेः प्रथमं रामचरिताश्रितं नाटकं महावीरचरितं विद्यते। नाटकस्यास्य कथास्रोतः वाल्मीकिरामायणमेव किन्त्वत्र नाटककारेण बहुत्र परिवर्तनं कृतम्, बहुशश्च नूतनमितिवृतं परिकल्पानुप्रवेशितम्। यथा–माल्यवान् नामा रावणस्य मन्त्रीः शूर्पणखा च तत्सहायिनी मिथिलाक्षेत्रे प्रेविशतः, कूटयोजनो च तनुते, अयोध्यायां मन्थरादासी मुत्साहयति, तत्कूटफलमेव यत् रामादीनां राज्यात् निर्वासनं भवति, पश्चात् रावणेन सीता हृता। एवमेवान्यत्रापि कथापरिवर्तनं नाटककारेण कृतम्।

वाल्मीकिकाले देशकालस्य का व्यवस्था लोकानां च का अवस्था अभवत् कथं वाल्मीकिना तत्सर्वं परिशीलिमिति प्रश्नः विमर्शार्हः। रामायणकाले कथं बहवो काठका दण्डमाणवास्तथा च लोकायतिका समाजे व्याप्ता वर्धन्ते स्म चेति। समाजे ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्चाण्डालाः किरातादये वा कथं व्यवहरन्ति स्म इति वाल्मीकिना सूक्ष्मेक्षिकया अदर्शि। कृत्स्नं रूपकचक्रमिदं तावदेकस्यैव कर्तुः कृतिरित्यत्र प्रायः सर्वेषां विदुषामैकमत्यमालोक्यते। वक्ष्यमाणाभिर्वायोयुक्तिभिश्च एककर्तृकत्वमिदं साध्यते। तद्यथा–

संस्कृते रूपकान्तरेशु प्रायः सर्वत्र 'नान्द्यन्ते' इति श्लोका नन्तरमेव।

रूपकान्तरेषु यत्र ''प्रस्तावना'–शब्दप्रयोगो दृश्यते, तत्र, रूपकेषु एषु 'स्थापना' शब्दः प्रयुज्यते। रूपकान्रेषु च रूपकानाम्– कविनामसंसूचनार्थं या 'प्ररोचना' पठयते, तस्या अत्र सर्वथाऽभावो दृश्यते।

न्यूनातिन्यूनं चतर्षु रूपकेषु नान्द्यां 'मुद्रालौार–बलेन प्रदर्शितानि तत्तत्प्रधानपात्राणां नामधेयान्यधीयन्ते। वक्ष्यमाणाभिश्च रीतिभीः रूपकाणि इमानि मिथः सम्बद्धानि आसाद्यन्तेः–

यथा भवभूतिकृतम् उत्तररामचरितं तदीयं महावीरचरितम्, तथा इह स्वप्नवासवदत्तं प्रतिज्ञायौगन्धरायणम्, उत्तरार्द्धतया अन्वेति। अनयोद्वयोस्तान्येव पात्राणि, सैव शब्दप्रयोगपरिपाटी शैली, चरित्र चित्रणं च इति बहुशः सादृश्य पश्यामः। अन्यच्च, स्वप्नवासवदत्ते कति चित् प्रतिज्ञायौगन्धरायणीया उल्लेखा अपि लभ्यन्ते।

महाकविः कालिदासः सरस्वत्या वरदपुत्रः सुरभारत्याश्च शाश्वतश्रृंगारोऽस्ति। तस्य साहित्यमेकस्तादृशोऽनुपमरत्नराशिरस्ति यस्मिन्ननेकानि दीप्तरत्नानि चिरादेव समुद्भासन्ते। अनेन रत्नराशिना समस्तभारतीय साहित्या श्रीवृद्धौ यदपूर्वयोगदानं प्रदत्तमस्ति तदपरिमेयमेवास्ति।

परवर्तिनः प्रायः सर्वे साहित्यकारा अस्माद्ररत्न राशेर्भाव भाषाकल्पनानाममूल्यानि रत्नानि गृहीत्वा स्वकल्पनामलंकृतां काव्यसम्पदं च श्रीसमृद्धिसम्पन्नां कृतवन्तः सन्ति। महाकवेरयं साहित्यनिधिस्तदनुवर्त्तिनां संस्कृतस्य प्रायः सर्वेषां कविनाटककाराणां कृते उपजीव्यमेवाभूदिति सर्वे जानन्ति सुधियः।

धर्मविषये कालिदासोऽतीवोदारः प्रतीयते। तस्य धार्मिकभावनायां क्वचित्संकीर्णता न दृश्यते। यद्यपि स प्रधानतः शिवस्योपासक आसीत्, किन्तु स महाविष्णुं, शिवं ब्रह्माणं च समानभावेन, समानादरेण वर्णितवान्। स एकस्मिन्नेव 'ईश्वरे' विश्वसितिस्म। स ईश्वर सर्वव्यापकं मन्यतेस्म। मालविकाग्निमित्रस्य नान्दीश्लोके परमशिवस्य वर्णने स कथयति यद् यद्यपि स परमेश्वरे वरमन्येभ्यो ददाति, तथापि स्वयं दीनाभरणोऽस्ति।

कालिदासेन सर्वांगसम्पूर्णो हिन्दुधर्मः खलु प्रतिनिधीयते। तस्य हि चातुर्वर्ण्ये चातुराश्रम्ये च भूयिष्ठा श्रद्धा दृश्यते। एतच्चरघुवंशे प्रारम्भिकेषु पद्येषु पठ्यमानेन–

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।[1]

तस्तस्य मते धर्मार्थकाममोक्षात्मक एव पुरुषार्थः। मुमुक्षुणा सता एव पुरुषेण यथाधर्मअर्थ–कामपरेण भवितव्यम्। एतच्चासौ स्वग्रन्थेषु तत्तत्पात्रचारित्र्येण सम्यक् निदर्शयति। तद्यथा, यावद् दुष्यन्तस्य 'क्षत्रि कन्या खलु एषा' इति निश्चयो न भवति, तावदसौ तस्यां नानुरज्यते। राजसभामागतां च शकुन्तलां स केवलं 'परस्त्री खलु एषा' इति कृत्वा प्रत्याख्याति।

संस्कृतसाहित्ये महाकवेः कालिदासस्य यशोराशिविषये गौरवविषये वा किमपि कथनमनावश्यकमिव प्रतिभाति। अस्य कीर्तिकौमुदी स्वदेशे विदेशे वा न कस्य नयनयोराह्लादिनी? महाकविरयं स्वमहाकाव्यखण्ड – काव्यनाटकादिभिर्निखिलविश्नेत्रेषु चाकचिक्यं जनयन् सर्वोपरि विभातीत्यत्र नास्ति कश्चन विवादः।

वैदर्भीरीत्या आदर्शीभूता खलु कालिदासस्य रचना। 'स हि संस्कृत साहित्ये सर्वकवीनां सर्वनाटककारीणां चाग्रणीः' इति तावत्सर्वसम्मतम्। 634तमे खीष्टाब्दे समुत्कीर्णे ऐहोलशिलालेखे स परमप्रशस्तोऽस्ति। स्वहर्षचरिते च–

'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मंजरीष्विव जायते'।।

इति बाणोऽपि तमुपश्लोकयति।

पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासः।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव।।

इति पद्याच्च भारतीयमते कालिदासस्य कविचक्रवर्तित्वं सुस्पष्टम्। न केवलं भारतीयाः समालोचकाः, अपितु पाश्चात्यविद्वांसोऽपि महाकवि कालिदासस्य प्रशंसा मुक्तकण्ठेन कृतवन्तः सन्ति। उदाहरणार्थं जर्मनमहाकवेः गेटेमहोदयस्य कालिदासीयाभिज्ञानशाकुन्तलविषयकं कथनमिदं श्रवणीयमस्ति–

वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यद्
यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम्।
एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयो–
रैश्वर्यं यदि वांछसि प्रियसके! शाकुन्तलं सेव्यताम्।।

अर्थात् 'हे सुहृद् यदि भवान् ऋतुमुखे उद्गतान् कोरकान् ऋतुपर्यन्ते पक्वानि फलानि च, येन येन च मनो मोह्यते मोद्यते तर्प्यते मोष्यते तत्तत्सर्वं दिदृक्षति, यया च एकया मधुरया संज्ञया द्यावापृथिव्यां उभे अभिहिते भवतः ता शुश्रूषते, तदा 'शकुन्तला' इति ब्रवीमि, सर्वं चैकेनैव शब्देनोक्तं भवति'।

व्यंग्यार्थप्रधानं खलु कालिदासकाव्यमस्तीति सर्वविदितम्। कथावस्तुनिर्माणे पात्रचरित्र चित्रणे च कालिदासस्य महत्त्वकौशलमस्ति। भाषाऽपि कालिदासरचनासु यथापात्रं यथाकालं च परिवर्तमाना नितरां सहृदयहृदयानि हरति। उपमानानि अन्वेष्यन्ती लोके शास्त्रे च प्रति बन्धं कवेः कल्पना विहरति। तेन हि व्याकरणालंकारशास्त्राभ्यामपि कालिदासेनोपमानानि समुपादीयन्ते। लुप्तोपमाभि एतादृशचमत्कारस्यानुदयात्पूर्णोपमा एव प्रायेण कालिदासेन सर्वत्र प्रयुक्ताः। आंग्लकविर्वर्ड्सवर्थ इव कालिदासोऽपि लोके जडतया गृह्यमाणां प्रकृतिं चैतन्यमयीं मत्वा तां मानवकुटुम्बे समावेशयति। अपूर्वा चास्य जडचेतनप्रकृतिपर्यवेक्षणस्य शक्तिः। वनपर्वतपवनप्रभृतिभिः प्रकृतिवस्तुसमूहैः सह संल्लपन्निव ननु स दृश्यते। पशवः पक्षिणस्तरवोलताः सर्वे मनुष्यवदेव हर्षशोकचिन्तावनतस्तं प्रतिभान्ति। एतेन हि गुणसमुदायेन नूनं सर्वकविषु अतिशायीसर्वाधिकगौरवशाली च किल कालिदासः।

यद्यपि कस्यापि कवेर्विषये विभिन्नालोचकानां मानदण्डो भिन्नो–भिन्नो दृश्यते किन्तु भारतीयकवीनां कालिदासस्य सर्वश्रेष्ठकवित्वविषये प्राचीनभारतीयपरम्पराविद्वांसः, आधुनिकयुगस्य च पौरस्त्यपाश्चात्त्य विद्वांसः सर्वे समालोचका ऐकमत्यं विद्धति। कोऽपि प्रतिभाशाली कविर्देशस्य कालस्य च सीमानमतिक्रान्तस्तिष्ठतीतिमतं कालिदासस्य विषयेऽक्षरशः सत्यं विद्यते। कालिदासस्य कलाचमत्कारो न केवलं भारतवर्षपर्यन्तमेव सीमितोऽस्ति। तस्याभिज्ञानशाकुन्तलं पौर्वात्यपाश्चात्यदेशे सर्वत्र ख्यातिगौरवसमारूढं तिष्ठति तस्य चानुवादः संसारस्य प्रायः सर्वदेशीयभाषासु समुपलभ्यते। वर्तमानसमयात् 1500 वर्षाणि पूर्वं यस्य कालिदासस्य ग्रन्था मानवहृदयान्युल्लसितानि कृतवन्त आसन् तथैव तेऽद्यापि काव्यरसिकानाह्लादितान्कुर्वन्ति भविष्ये करिष्यन्ति चेत् सर्वेषां विश्वासः। 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः' इत्युक्तिः कालिदासकृतिषु सर्वथाऽक्षरशः संघटिता भवति। कलासौन्दर्यस्यानुशीलनमेव मानवस्याध्यात्मिकपरितृप्तिरस्ति। भारतीयकलाकाराणां कृतयोऽद्यापि संसारिकजनान् चकितान् कुर्वन्ति। गुप्तमौर्यकालीनवास्तु कलाऽजन्ताचित्रकला चेदानीमपि संसारे निजाद्वितीयं स्थानं प्राप्तं कृतवत्यः सन्ति। न केवलं भारतीयजनतायाः कृते, अपितु समस्तमानवजातेः कृते कालिदासस्येदमाध्यात्मिकयोगदानं सदा सर्वत्र सरसहृदयजना– नाह्लादितान्कुर्वन्स्थास्यतीति निःसंदिग्धम्।

भोजराजेन धाराधीशेन कृता रामायणचम्पूः किष्किन्धाकाण्डावसाना एव, तस्या युद्धकाण्डं लक्ष्मणभट्टेन कृतम्। अयं भोजराज एकादशशतको वः प्रसिद्ध साहित्यसेवी। चम्पूरामायणस्य साहित्यिकं गौरवमतिमहत्त्वपूर्णम्। भोजस्य शब्दगुम्फः स्वभावसरलः अर्थराशिश्च चमत्कारातिशयशाली। अस्य वाल्मीकिकाव्यप्रशंसायां लिखितं पद्यं नितान्तहृद्यम्–

'वाल्मीकिगीतरघुपुंवकीर्त्तिलेशैः—
स्तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गांजलैर्भुवि भगीरथ यत्नलब्धैः
किं तर्पणं न विदधाति नरः पितृणाम्।।'

सीताया अशोकवाटिकायां तिष्ठन्त्या दशां वर्णयति कविः—

'उपघ्नवृक्षस्य परोक्षभावादाश्रित्य भूमिं सुचिरं लुठन्त्याः।
नक्तञ्चरस्त्रीमुखकर्शितायाः सीतालतायास्त्रिजटा जटाऽभूत्।।'

तदिदमतिचमत्कारि चम्पूकाव्यम्।

संस्कृतभाषायां नाटकानां प्रणेतृषु प्रधानान्यतमस्य भवभूतेर्वास्तविकं नाम श्रीकण्ठ इत्यासीत्। 'गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ' इति पद्यप्रण्यनमूलकमस्य भवभूतिनाम्ना प्रथमं श्रूयते। विदर्भदेशवासी श्रोत्रियविप्रवंश्यश्चायं विविधागमशास्त्रपारदृश्वासीत्।

हर्षचरिते बाणभट्टः भवभूतेनमि कीर्त्तयति, अष्टमशतकोत्पन्नो वामनश्च तदीयग्रन्थतः स्वग्रन्थे उदाहरणं ददाति। राजशेखरोपि भवभूतिं स्वपूर्वभवं प्रख्यापयति—

'स्थितः पुनर्यो भवभूतिरेखाया स राजते सम्प्रति राजशेखरः।' इति। राजतरंण्यिाम्—

'कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम्।।' [2]

इति निर्दिशन् कल्हणो भवभूतेर्यशोवर्मकालिकतां प्रत्येति, यशोवर्मा च 736 मिते खीष्टाब्दे ध्रियते स्म। एभिः साक्ष्यैर्भवभूतेः समयः सप्तमशतकासन्नः प्रतिपन्नः।

अस्य कृतित्रयमधुना प्राप्यते—1.महावीरचरितम्, 2. उत्तररामचरितम्, 3. मालतीमाधवञ्च। कृतित्रयमपि रूपकप्रकारान्तर्गतमेव। तत्र प्रथमा कृतिः महावीरचरितमित्यालोचका निश्चयन्ति। यदा महावीरचरितस्य कट्वो आलोचना तत्कालभवैरालोचकै प्रस्तुता तदायं महाकविस्तान् धर्षयन्निवावोचत्—

'ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्तु ते किमपि तान्प्रति नैष यत्नः। उत्पत्स्यतेस्ति तु मम कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी।।'

इति।

'यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जने जनः।'

अस्य महाकवेः स्वकवित्वे महानादर आसीत्। अयं हि स्वं वाग्देवताया अधिष्ठातारं मन्यते स्म, तदुक्तं तेनैव—'यं ब्रह्माणमियं देवी वाग्वश्येवान्ववर्त्तत।'

करुणरसप्रधानकाव्यनिर्माणे कवेरस्य प्रसिद्धिः। तथा चोक्तम्—

'भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा।।' [3]

## संदर्भ


1. रघुवंशमहाकाव्यम् – 1/8 ।
2. संस्कृतसाहित्येतिहासः, पृ. सं.—109 ।
3. तत्रैव।